# संस्कृतनाट्यस्तबकः । (सरलार्थलेखनार्थम्)

## प्रथमं पुष्पम्

संस्कृतकविषु कालिदासस्य स्थानम् अनन्यसाधारणम् । 'अभिज्ञानशाकुन्तलम्' इति तस्य प्रसिद्धं नाटकम्। तस्य काव्यनाटकेषु भारतीयसंस्कृतेः मूल्यानां च प्रतिबिम्बं दृश्यते । इदानीन्तनकालेऽपि तस्य साहित्यं जनान् रञ्जयति ।



(ततः प्रविशति वैखानसः, अन्यौ तापसौ च)

वैखानसः – (राजानम् अवरुध्य) राजन् ! आश्रममृगोऽयं, न हन्तव्यः, न हन्तव्यः । आशु प्रतिसंहर सायकम्। राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम् ।

दुष्यन्तः – प्रतिसंहृत एषः सायकः । (यथोक्तं करोति)

वैखानसः – राजन् ! समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य कुलपतेः अनुमालिनीतीरमाश्रमो दृश्यते। प्रविश्य प्रतिगृह्यताम् आतिथेयः सत्कारः ।

दुष्यन्तः – तपोवननिवासिनामुपरोधो मा भूत् । अत्रैव रथं स्थापय यावदवतरामि ।

सूतः – धृताः प्रग्रहाः । अवतरतु आयुष्मान् ।

दुष्यन्तः – (अवतीर्य) सूत, विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम । इदं तावत् गृह्यताम् । (इति सूतस्याभरणानि धनुश्चोपनीय) सूत, यावदाश्रमवासिनः दृष्ट्वाऽहमुपावर्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः।

सूतः – तथा । (इति निष्क्रान्तः ।)

### भाषाभ्यासः

**१) माध्यमभाषया उत्तरत ।** दुष्यन्तस्य कानि स्वभाववैशिष्ट्यानि ज्ञायन्ते ?

शूद्रकविरचितं 'मृच्छकटिकम्' संस्कृतनाट्यवाङ्मये वैशिष्ट्यपूर्णं खलु । चारुदत्तस्य पुत्रः रदनिकां 'सुवर्णशकटिकां' याचते किन्तु निर्धनः चारुदत्तः शकटं दातुं न शक्नोति । तदा एव रदनिका वसन्तसेनाम् उपगच्छति। सोऽयं प्रसङ्गः ।



**रदनिका** – एहि वत्स! शकटिकया क्रीडावः ।

**दारकः** – (सकरुणम्) रदनिके! किं मम एतया मृत्तिकाशकटिकया; तामेव सौवर्णशकटिकां देहि ।

**रदनिका** – (सनिर्वेदं निःश्वस्य) जात! कुतोऽस्माकं सुवर्णव्यवहारः? तातस्य पुनरपि ऋद्ध्या सुवर्णशकटिकया क्रीडिष्यसि। (स्वगतम्) तद्यावद्विनोदयाम्येनम् । आर्यावसन्तसेनायाः समीपमुपसर्पिष्यामि । (उपसृत्य) आर्ये! प्रणमामि ।

**वसन्तसेना** – रदनिके! स्वागतं ते । कस्य पुनरयं दारकः? अनलङ्कृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।

**रदनिका** – एष खलु आर्यचारुदत्तस्य पुत्रो रोहसेनो नाम ।

**वसन्तसेना** – (बाहू प्रसार्य) एहि मे पुत्रक! अनुकृतमनेन पितुः रूपम् । अथ किं निमित्तमेष रोदिति?

**रदनिका** – एतेन प्रतिवेशिक-दारकस्य सुवर्णशकटिकया क्रीडितम्, तेन च सा नीता, ततः पुनस्तां याचते ततो मया इयं मृत्तिकाशकटिका कृत्वा दत्ता । ततो भणति..'रदनिके! किं मम एतया मृत्तिका-शकटिकया, तामेव सौवर्णशकटिकां देहि' इति ।

**वसन्तसेना** – हा धिक्, हा धिक् । मा रुदिहि, तद् गृहाणैतमलङ्कारम्, सौवर्णशकटिकां घटय ।

(इति दारकमादाय निष्क्रान्ता रदनिका ।)

## भाषाभ्यासः

**१) माध्यमभाषया उत्तरत ।** रोहसेनः किमर्थं रोदिति ?

भासः इति संस्कृतनाट्यसृष्टेः प्रथमः नाटककारः । तस्य शैली सुबोधा सरसा च । भासनाटकचक्रे महाभारतकथाम् अनुसृत्य लिखितः शोकात्मकः एकाङ्कः नाम 'कर्णभारम्' । अस्मिन् प्रसङ्गे शक्रः नाम इन्द्रः याचकरूपेण आगत्य कर्णं कवचकुण्डलानि याचते ।



(ततः प्रविशति याचकरूपेण शक्रः ।)

शक्रः – (कर्णमुपगम्य) भोः कर्ण, महत्तरां भिक्षां याचे ।

कर्णः – दृढं प्रीतोऽस्मि भगवन् । एषोऽहं नमस्करोमि ।

शक्रः – (आत्मगतम्) किं नु खल्वहं वदामि ? यदि दीर्घायुर्भवेति वदेयम् दीर्घायुर्भवेत् । यदि न वदेयम् मूढ इति मां परिभवति । तस्माद् उभयं परिहृत्य किं नु खलु भाषे ? भवतु, दृष्टम् । (प्रकाशम्) भोः कर्ण, सूर्य इव, चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः ।

कर्णः – भगवन्, किं नोक्तम् दीर्घायुर्भवेति ? अथवा यदुक्तं तदेव शोभनम् । यतः हतेषु देहेषु गुणाः धरन्ते । भगवन्, किमिच्छसि ? किमहं ददामि ?

शक्रः – महत्तरां भिक्षां याचे ।

कर्णः – महत्तरां भिक्षां भवते प्रदास्ये । गोसहस्रं ददामि ।

शक्रः – गोसहस्रमिति ? मुहूर्तकं क्षीरं पिबामि । नेच्छामि कर्ण, नेच्छामि ।

कर्णः – किं नेच्छति भवान् ? अपर्याप्तं कनकं ददामि ।

शक्रः – गृहीत्वा गच्छामि । नेच्छामि कर्ण, नेच्छामि ।

कर्णः – तेन हि जित्वा पृथिवीं ददामि ।

शक्रः – पृथिव्या किं करिष्यामि । नेच्छामि कर्ण, नेच्छामि ।

कर्णः – अथवा मच्छिरो ददामि ।

शक्रः – अविहा । अविहा ।

कर्णः – न भेतव्यम् न भेतव्यम् । अन्यदपि श्रूयताम् । अङ्गैः सहैव जनितं कवचं कुण्डलाभ्यां सह ददामि ।

शक्रः – (सहर्षम्) ददातु, ददातु ।

## भाषाभ्यासः

**१) माध्यमभाषया उत्तरत ।** शक्रस्य कपटं विशदीकुरुत ।